**दिनाङ्क :**-24.09.2025 **प्रात:** - 06:55

**राजनाथः-मोरोक्को**

रक्षामंत्री राजनाथसिंहः तथा तस्य मोरक्को-देशस्य समकक्षि अब्देलतिफ् लौदि च ह्यः बेरिचिड्-नगरे टाटा-अड्वान्स्ड्-सिस्टम्स्-लिमिटेड् (टी. ए. एस्. एल्.) इत्यनेन स्थापितस्य भारतस्य प्रथमस्य वैदेशीय-रक्षा-विनिर्माण-संयंत्रस्य संयुक्तरूपेण उद्घाटनं कृतवन्तौ। उद्घाटनम् भारत-मोरक्को-देशयोः विकसिते सामरिकसहभागित्वस्य कृते ऐतिहासिकः क्षणः इति वर्णयन्, श्री सिंहः अवदत् यत्, भारतस्य आत्मानिर्भर-भारतस्य परिकल्पना न केवलं स्वकीयावश्यकतानां निर्माणम्, अपितु विश्वस्य कृते उन्नत-तन्त्रज्ञानस्य तथा उच्च-गुणवत्तायुतानां उत्पादानां विश्वसनीयस्रोतः भवितुं चास्ति। रक्षामन्त्रालयः अवदत् यत् अनुबन्धस्य अन्तर्गतं टी. ए. एस्. एल्. इतीमानि वाहनानि रायल्-मोरक्कन्-सेनायाः कृते प्रददाति, प्रारम्भिक-वितरणानि अग्रिमे मासे आरभ्यन्ते इति। एतत् मोरक्को-साम्राज्यस्य बृहत्तमं रक्षा-विनिर्माण-केन्द्रम् अस्ति, यत् आफ्रिकादेशे भारतीय-निजी-समवायेन द्वारा निर्मितं प्रथमं एतादृशं केन्द्रम् अस्ति।

चलच्चित्रपुरस्कार ः

ह्यः, एकसप्ततितमे राष्ट्रियचलच्चित्रपुरस्कारसमारोहे, शाहरुख् खानाय जवान इति चलचित्राय विक्रान्तमेस्सी इत्यस्मै 12वीं फैल इत्येदर्थं च सर्वश्रेष्ठनटत्वेन पुरस्काराः प्रदत्ताः, रानी मुखर्जी इत्येषा मिसेस् चेटर्जी वर्सेस् नार्वे इति चित्र-फलकाय सर्वश्रेष्ठ-अभिनेतृत्वेन पुरस्कारं प्राप्तवती। 'कटहल अ ज ैकफ्रूट् मिस्टरी' इति सर्वश्रेष्ठहिन्दीचलचित्रस्य पुरस्कारं प्राप्तवत्। एतदतिरिच्य, सुप्रसिद्धः अभिनेता, निर्देशकः, निर्माता च मोहनलालः चलचित्रक्षेत्रे सर्वोच्च-मान्यतारूपेण दादासाहेब-फाल्के इति पुरस्कारेण सम्मानितः।

ह्यः नवदेहली-नगरस्य विज्ञानभवने अयं कार्यक्रमः आयोजितः।

राष्ट्रपतिः द्रौपदी मुर्मु इत्येषा विजेतृभ्यः पुरस्कारान् प्राददात्। चलचित्रनिर्माणस्य, कथा कथनस्य, अभिनयस्य च उत्कृष्टतायाः उत्सवार्थं विभिन्नेषु वर्गेषु पुरस्काराः प्रदत्ताः।

अस्मिन् अवसरे उत्पल-दत्तः सर्वश्रेष्ठचलच्चित्रविमर्शकस्य राष्ट्रियचलच्चित्रपुरस्कारं असमीयभाषायाः चलच्चित्रस्य विषये तस्य विस्तृतमहत्त्वपूर्णाय च विमर्शात्मकलेखनाय प्राप्तवान्।

**वैष्णव - रेल**

दीपावली, षष्ठी इत्यादिषु प्रमुखेषु उत्सवेषु बहुसंख्यकाः जनाः आगच्छन्ति। एतत् मनसि कृत्वा रेलमन्त्री अश्विनीवैष्णवः उत्सवेषु द्वादशसहस्र विशेषरेलयानानि चालयिष्यति इति घोषितवान्।

**माण्डवीया - पैरा-अथ्लटिक्स्**

युवप्रकरणानां क्रीडामन्त्री डा. मनसुख माण्डवीयः अवदत् यत् भारतं वैश्विक-प्रतियोगितानां आयोजनक्षमतया अन्ताराष्ट्रिय-क्रीडानां केन्द्ररूपेण उद्भूतम् अस्ति। नवदिल्ल्यां अस्मिन् मासे पञ्चविंशति दिनाङ्कात् आरभ्यमानस्य पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य विश्व-पैरा-अथ्लेटिक्स्-च्याम्पियन्शिप्- इत्यस्य सज्जतायाः निरीक्षणं कुर्वन्, श्री माण्डवीयः अवदत् यत्, शततोप्यधिकाः देशाः भागं ग्रहीतवन्तः, एषा न केवलं भारतेन आयोजिता बृहत्तमा पैरा-अथ्लेटिक्स्-स्पर्धा अस्ति अपितु देशस्य क्षमतायाः, समृद्ध संस्कृतेः, एकीकृतशक्तिरूपेण क्रीडायाः प्रतिबिम्बः अस्ति।

**ऋतु विभागः**

भारत-ऋतु-विज्ञान-विभागेन अगामि दिन-द्व्योः पश्चिमबङ्गाल-ओडिशा-छत्तीसगढ-राज्यानां पृथक्-पृथक् स्थानेषु अत्यधिक-वृष्टेः ऑरेंज-अलर्ट इति नारङ्ग-वर्णीया सञ्चेतना प्रसारितास्ति। अद्य पूर्वोत्तरराज्येषु, बिहार्, झारखण्ड्, मध्यप्रदेश्, तेलङ्गाना, विदर्भ इत्यादिषु प्रदेशेषु अपि प्रचण्डतः अतिवृष्टिः भविष्यति इति ऋतु विभागेन पूर्वानुमानितम् अस्ति।

**क्रिकट्-एशिया कप्-**

पुरुषाणां विंशति प्रति विंशतिः एशिया कप् क्रिकेट् प्रतियोगितायां, यू. ए. ई.-देशस्य अबुधाबी-नगरस्य शेख्-जायद्-क्रीडाङ्गणे पाकिस्तान्-दलेन श्रीलङ्का दलं पञ्च स्तोभैः पराजितम्।

**।।इति वार्ता:।।**